This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No. | | | | | | | | | | | | |
अनुक्रमाङ्कः

Code No. 62/S/N
गूढसंख्या

SET No. A
स्तबकः

# VEDA ADHYAYAN
## वेदाध्ययनम्
## (245)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ______________________

Signature of two Invigilators 1. ______________________
(निरीक्षकयोः हस्ताक्षरम्)
2. ______________________

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।



UNNATI EDUCATIONS
9899436384, 9654279279

# VEDA ADHYAYAN

## वेदाध्ययनम्

## (245)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)]** **[पूर्णाङ्काः (Full Marks) : 100**

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **[A]** भागे **10**, **[B]** भागे **10**, **[C]** भागे **10** **[D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

[A] दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) को वेदः सर्वप्रथमम् आविरासीत् ?

(क) यजुर्वेदः (ख) सामवेदः

(ग) ऋग्वेदः (घ) अथर्ववेदः

(2) हलायुधः शुक्लयजुर्वेदस्य कस्याः संहितायाः भाष्यं लिखितवान् ?

(क) माध्यन्दिनस्य (ख) काण्वस्य

(ग) ऐतरेयस्य (घ) गोपथस्य

(3) वशिष्ठविश्वामित्रयोः संवादः कस्मिन् वेदे अस्ति ?

(क) ऋग्वेदे (ख) सामवेदे

(ग) यजुर्वेदे (घ) अथर्ववेदे

(4) यजुर्वेदीयः पुरोहितः कः ?

(क) अध्वर्युः (ख) होता

(ग) ब्रह्मा (घ) उद्गाता

(5) वेदस्य पर्यायशब्दः –

(क) तन्त्रम् (ख) आगमः

(ग) संहिता (घ) दर्शनम्



**UNNATI EDUCATIONS**
**9899436384, 9654279279**

(6) गायत्रीच्छन्दसि साकल्येन कति अक्षराणि विद्यन्ते ?

(क) 24 (ख) 30

(ग) 34 (घ) 16

(7) शुनः शेपोपाख्याने हरिश्चन्द्रस्य पुत्रस्य नाम किम् ?

(क) पूर्णचन्द्रः (ख) रोहितः

(ग) पुरूरवाः (घ) शुनःशेपः

(8) दिवसे विद्यमानस्य सूर्यस्य नाम किम् ?

(क) मार्तण्डः (ख) वरुणः

(ग) सविता (घ) मित्रः

(9) शयते इत्यस्य लौकिकं रूपं किम् ?

(क) शयति (ख) शयितः

(ग) शेते (घ) शेरते

(10) तेजस्विन् इत्यत्र मत्वर्थे विनिप्रत्ययः केन सूत्रेण ?

(क) अस्मायामेधास्रजो विनिः (ख) बहुलं छन्दसि

(ग) छन्दसि परेऽपि (घ) छन्दसि च

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) को नाम प्रचयस्वरः ? 1+1

(2) महीधरः कुत्र जन्म अलभत ? सः कस्य वेदस्य भाष्यं कृतवान् ? 1+1

(3) विनियोगपदस्य कः अर्थः ? विनियोगः कतिविधः, के च ते ? 1+1

(4) नैयायिकाः वेदस्य पौरुषेयत्वम् अनित्यत्वं च किमर्थं स्वीकुर्वन्ति ? 1+1

(5) उषस्सूक्तं कस्मिन् वेदे अन्तर्भवति ? उषस्सूक्तस्य ऋषिच्छन्दोदेवतानामानि लेख्यानि । 1+1

(6) पूषदेवतायाः अपरं नाम किम् ? कथं तस्य पूषा इति नाम ? 1+1

(7) छन्दसि निष्टयर्क्यदेवहूय – इति सूत्रं सम्पूर्णं लिखत । सूत्रस्यैकम् उदाहरणं लिखत । 1+1

(8) सोममर्हति यः इति सूत्रेण कः प्रत्ययो विधीयते ? किं चात्र उदाहरणम् ? 1+1

(9) ओजस्यम् इति पदस्य कोर्थः ? किं चात्र यत्प्रत्ययविधायकं सूत्रम् ? 1+1

(10) नभस्यः इत्यत्र कः प्रत्ययः ? किं चात्र सूत्रम् ? 1+1



**UNNATI EDUCATIONS**
**9899436384, 9654279279**

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) यागस्य प्रकाराः कति ? होमं यथाधीतं व्याख्यात ।

(2) वेदस्य कालविषये बालगङ्गाधरतिलकस्य मतं संक्षेपेण आलोचयत ।

(3) समानो मन्त्रः समितिः समानी – इति मन्त्रं सम्पूर्णं लिखित्वा तस्यार्थं लिखत ।

(4) अभि नो नर्यं वसु वीरं प्रयतदक्षिणम् । वामं गृहपतिं नय – मन्त्रमिमं व्याख्यात ।

(5) यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि ।
यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः ॥ इति मन्त्रं सप्रसङ्गं विवृणुत ।

(6) ऋणमस्मिन् सन्नयत्यमृतत्वं च गच्छति ।
पुता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥ – इति मन्त्रं सप्रसङ्गं व्याख्यात ।

(7) प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने ।
गावेव शुभ्रे मारता रिहाणे विपाट्छुतुद्री पयसा जवेते ॥ – इति मन्त्रं सप्रसङ्गं व्याख्यात ।

(8) नक्षत्रियः इति रूपं साधयत ।

(9) लेटोऽडाटौ इति सूत्रं सोदाहरणं व्याख्यात ।

(10) तेजस्वी इति रूपं साधयत ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) वेदस्य पाठप्रकारान् उल्लिख्य यथेच्छं द्वयं व्याख्यात ।

(2) विश्वामित्रनदीसंवादस्य सारं वर्णयत ।

(3) नक्षत्राद्धः इति सूत्रं सोदाहरणं व्याख्यात ।

(4) वर्धन्तु इति रूपं साधयत ।

(5) समुद्रियाः इति रूपं साधयत ।



UNNATI EDUCATIONS
9899436384, 9654279279